अथवा क्वाथनेनैव सिद्धमुष्णोदकं वदेत् ॥'

अथ क्षीरपाकविधिः ।

'क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं शूलमामोद्भवं जयेत् ॥'

अथावलेहविधिः ।

'क्वाथादेर्यत् पुनः पाकात् घनत्वं सा रसक्रिया ।
सोऽवलेहश्च लेहश्च तन्मात्रा स्यात् पलो-
न्मिता ॥'

अथ वटिकाविधिः ।

'वटिका अथ कथ्यन्ते तन्नामवटिका वटी ।
मोदको गुटिका पिण्डी गुड़ो वर्त्तिस्तथोच्यते ॥
लेहवत् साध्यते वह्नौ गुड़ो वा शर्करायवा ।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्म्मिता वटी ॥'

अथ सन्धानविधिः ।

'द्रवेषु चिरकालस्थं द्रव्यं यत् सन्धितं भवेत् ।
आसवारिष्टभेदैस्तत् प्रोच्यते भेषजोचितम् ॥'

अथ धातूनां शोधनमारणविधिः । तत्र
शोधनविधिः ।

'पत्तलीकृत्य पत्राणि हेम्नो वह्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा ।
एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत् ॥'*॥

अथ स्वर्णस्य मारणविधिः ।

'स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्द्दयेत् ।
तद्गोलकसमं गन्धं निदध्यादधरोत्तरम् ॥
गोलकञ्च ततो रुद्ध्वा शरावदृढ़संपुटे ।
त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्द्दश ।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ॥"

अथ स्नेहपानविधिः ।

स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा ।
मज्जा च तत् पिबेन्मर्त्यः किञ्चिदभ्युदिते रवौ ॥

अथ पञ्चकर्म्माणि ।

प्रथमं वमनं पश्चाद्विरेकश्चानुवासनम् ।
एतानि पञ्च कर्म्माणि निरूहेणोत्तरं तथा ॥

अथ फलवर्त्तिविधिः ।

घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णा स्वाङ्गुष्ठसन्निभा ।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता ॥

अथ नस्यग्रहणविधिः ।

नस्यं तत् कथ्यते धीरैर्नासाग्राह्यं यदौषधम् ।
नावनं नस्तकर्म्मेति तस्य नाम द्वयं मतम् ॥

अथ धूमपानविधिः ।

धूमस्तु षड्विधः प्रोक्तः शमनो वृंहणस्तथा ।
रेचनः कासहा चैव वामनो व्रणधूपनः ॥

अथ गण्डूषकवलप्रतिसारणविधिः ।

तत्र गण्डूषः ।

स्नेहक्षीरकषायादिद्रवैः सम्पूर्णमाननम् ।
आपूर्य्य स्थीयते तावद्विधिर्गण्डूषधारणे ॥

अथ कवलः ।

वातपित्तकफघ्नस्य द्रव्यस्य कवलं मुखे ।
कृत्वा निःक्षिप्य संचर्य्य निष्ठीवेत् कवले विधिः ॥

अथ प्रतिसारणम् ।

दन्तजिह्वामुखानां यच्चूर्णकल्कावलेहकैः ।
शनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥

अथ स्वेदविधिः ।

स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितः ।
उपनाहो द्रवः स्वेदः सर्व्वे वातार्त्तिहारिणः ॥

अथ कर्णपूरणविधिः ।

स्वेदयेत् कर्णदेशन्तु किञ्चित्तु पार्श्वशायिनः ।
मूत्रैः स्नेहै रसैरुष्णैः कोष्णैः श्रोत्रं प्रपूरयेत् ॥
कर्णञ्च पूरितं रक्षेच्छतं पञ्चशतानि वा ।
सहस्रं वापि मात्राणां श्रोत्रकण्ठशिरोगदे ॥
रसाद्यैः पूरणं कर्णे भोजनात् प्राक् प्रशस्यते ।
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ॥*॥

अथालेपविधिः ।

अथालेपस्य नामानि लेपलेपनलिप्तयः ।
दोषघ्नो विषहा वर्ण्यः स च लेपस्त्रिधा मतः ।
न रात्रौ लेपनं कुर्य्यात् शुष्यमाणं न धारयेत् ॥

अथ शोणितस्रावणविधिः ।

शोणितं स्रावयेज्जन्तोरामयं प्रसमीक्ष्य च ।
प्रस्थं प्रस्थार्द्धमथवा प्रस्थार्द्धार्द्धमथापि वा ॥
शरत्काले स्वभावेन शोणितं स्रावयेन्नरः ।
त्वग्दोषग्रन्थिशोथाद्या न स्यू रुधिरपातनात् ॥

अथाश्च्योतनविधिः ।

क्वाथक्षौद्रासवस्नेहविन्दूनां यत्तु पातनम् ।
द्व्यङ्गुलोन्मीलिते नेत्रे प्रोक्तमाश्च्योतनं हितम् ॥

अथ विड़ालकविधिः ।

विड़ालको वहिर्लेपो नेत्रे पक्ष्मविवर्ज्जिते ।
तस्य मात्रा परिज्ञेया मुखालेपविधानवत् ॥

अथ तर्पणविधिः ।

वातातपरजोहीने वेश्मन्युत्तानशायिनः ।
आधारौ माषचूर्णेन क्लिन्नेन परिमण्डितौ ॥
समौ दृढ़ावसम्बाधौ कर्त्तव्यौ नेत्रकोषयोः ।
पूरयेद्घृतमण्डेन विलीनेन सुखोदके ॥

अथाञ्जनविधिः ।

"अथ सम्यग्दोषस्य प्राप्तमञ्जनमाचरेत् ।
अञ्जनं क्रियते नेत्रे तद्द्रव्यञ्चाञ्जनं मतम् ॥

अथ प्रत्यञ्जनविधिः ।

गतदोषमपेतास्रु प्रपश्यत् सम्यगम्भसा ।
प्रक्षाल्याक्षि यथादोषं कार्य्यं प्रत्यञ्जनं ततः ॥
इति भावप्रकाशः ॥*॥

अथ भेषजकरणभक्षणदिनम् । तत्र तिथयः
विष्टिभिन्नाः शोभनाः । वाराः रविसोमबुध-
बृहस्पतिशुक्राणाम् । नक्षत्राणि पूर्व्वफल्गुनी-
पूर्व्वाषाढ़ापूर्व्वभाद्रपन्मघाभरण्यश्लेषाविशाखा-
र्द्राभिन्नानि । जन्मर्क्षञ्च निषिद्धम् ।
"लग्नानि मिथुनकन्याधनुर्मीनसंज्ञकानि ।
तत्र गुरुबुधचन्द्रशुक्रेषु सत्सु प्रशस्तानि ॥"
इति ज्योतिषतत्त्वम् ॥

( करणं पुनर्भेषजम् । भेषजं नाम तत् यदुप-
करणाय उपकल्प्यते भिषजो धातुसाम्याभि-
निर्वृत्तौ प्रयतमानस्य विशेषतश्चोपायान्तेभ्यः ।
तद्द्विविधं व्यपाश्रयभेदात् दैवव्यपाश्रयं युक्ति-
व्यपाश्रयञ्च । तत्र दैवव्यपाश्रयं 'मन्त्रौषध-
मणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोप-
वासस्वस्त्ययनप्रणिपातगमनादि । युक्तिव्यपा-
श्रयं संशोधनोपशमने चेष्टाश्च दृष्टफलाः ।
एतच्चैव भेषजमङ्गभेदादपि द्विविधं द्रव्यभूत-
मद्रव्यभूतञ्च, तत्र यदद्रव्यभूतं तदुपायाभि-
प्लुतम् । उपायो नाम भयदर्शनविस्मापनक्षो-
भणहर्षणभर्त्सन वधबन्धस्वप्नसंवाहनादिरमूर्त्तो
भावः यथोक्ताः सिद्ध्युपायाश्च । यत्तु द्रव्य-
भूतं तद्वमनादिषु योगमुपैति । तस्यापीयं
परीक्षा, इदमेवं प्रकृत्या एवंगुणमेवंप्रभाव-
मस्मिन् देशे जातमस्मिन् ऋतौ एवं गृहीतमेवं
निहितमेवमुपस्कृतमनया मात्रया युक्तमस्मिन्
ऋतौ एवंविधस्य पुरुषस्यैतावन्तन्दोषमपकर्ष-
यति उपशमयति वा अन्यदपि चैवंविधं
भेषजमभूत्तच्चानेनानेन वा विशेषेण युक्तमिति ।
इति चरके विमानस्थानेऽष्टमेऽध्याये ॥ )

भेषजाङ्गं, क्ली, ( भेषजस्य औषधस्य अङ्गमवयव-
इव । ) अनुपानम् । इति शब्दचन्द्रिका ॥

भैक्षं, क्ली, ( भिक्षाणां समूह इति । भिक्षा+
भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इत्यण् ! )
भिक्षासमूहः । इत्यमरः । २ । ७ । ४७ ॥
अपि च ।
"भिक्षाशनमनुद्योगात् प्राक्केनाप्यनिमन्त्रितम् ।
अयाचितन्तु तद्भैक्षं भोक्तव्यं मनुरब्रवीत् ॥"
इति प्रायश्चित्ततत्त्वधृतोशनसो वचनम् ॥
( भिक्षैव स्वार्थे अण् । भिक्षा ॥ भिक्षाभवे
भिक्षालब्धे वा त्रि ॥ )

भैक्षजीविका, स्त्री, (भैक्षेण जीविका । ) भिक्षया
जीवनोपायः । तत्पर्य्यायः । पैण्डिन्यम् २ ।
इति त्रिकाण्डशेषः ॥

भैक्षभुक् [ज्] त्रि, भैक्षाशी । भिक्षाशी ।
भैक्षं भुङ्क्ते यः । इति कर्त्तरि क्विप्प्रत्ययेन ।
निष्पन्नं ॥ ( यथा, महाभारते ।१४ । ४६ । ३ ।
"गुरुणा समनुज्ञातो भुञ्जितान्नमकुत्सयन् ।
हविष्यभैक्ष्यभुक् चापि स्थानासनविहार-
वान् ॥" )

भैमी, स्त्री, ( भीमेनोपासिता भीमस्य इयं वेति ।
भीम+अण् ङीप् । ) भीमैकादशी । यथा,
अथ भैमी । विष्णुधर्म्मोत्तरे ।
"मृगशीर्षे शशधरे माघे मासि प्रजापते ! ।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते ॥
तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिली नावसी-
दति ॥"

मत्स्यपुराणे ।

"यद्यष्टम्यां चतुर्द्दश्यां द्वादश्यामथ भारत ! ।
अन्येष्वपि दिनर्क्षेषु न शक्तस्त्वमुपोषितुम् ॥
ततः पुण्यामिमां भीमतिथिं पापप्रणाशि-
नीम् ।
उपोष्य विधिनानेन गच्छ विष्णोः परं पदम् ॥
भीमतिथिं भैमीत्वेन ख्यातां एकादशीम् ॥
इत्येकादशीतत्त्वम् ॥*॥